(४)

॥ ॐ ॥

गोरक्षग्रन्थमालायां षट्पञ्चाशत्तमं पुष्पम्

# वृत्तमालास्तुतिः

महापण्डितस्थविरज्ञानश्रीमित्रविरचिता

काशी गोरक्षटिल्ला
योगप्रचारिणीतः
प्रकाशिता।

संशोधको
योगी नरहरिनाथो
मृगस्थलीस्थः

॥ ॐ ॥

गोरक्षग्रन्थमालायां षट्पञ्चाशत्तमं पुष्पम्

# वृत्तमालास्तुतिः

महापण्डितस्थविरज्ञानश्रीमित्रविरचिता

आदि–मत्स्येन्द्र–गोरक्ष–जलन्धर–पदानुगा ।
योगप्रचारिणी भूयात् सभा भव्याय भूतले ॥

संशोधको
योगी नरहरिनाथो
मृगस्थलीस्थः

काशी गोरक्षटिल्ला
योगप्रचारिणीतः
प्रकाशिता

गो० रा० सं० ३७८ शाके १८७८ वि० सं० २०१३
बुद्ध संवत् २५००

प्रथमावृत्तिः १००० ] मू० ।।।) [ सर्वाधिकाराः सुरक्षिताः

प्राप्तिस्थानम्—गोरक्षटिल्ला मन्दाकिनी काशी

## देवताविमर्शस्तुतिः

### ॐनमःश्रीसम्यक्सम्बुद्धस्वामिने

प्रत्यक्षतो न भगवान् सुगतो न विष्णुरालोक्यते न च हरो न हिरण्यगर्भः। तेषान्तु रूपचरितातिशयप्रभावान् श्रुत्वा विचारयति को गुणवान् न वेति ॥१॥ विष्णुः समुद्यतगदायुधरौद्रपाणिः शम्भुर्विलग्ननृशिरोग्रकपालमाली। एकान्तशान्तचरितातिशयस्तु बुद्धः कं पूजयाम उपशान्तमशान्तरूपम् ॥२॥ दुर्योधनादिकुलनाशकरो बभूव विष्णुर्हरस्त्रिपुरनाशकरः किलासीत्। क्रौञ्चं गुहोऽपि दृढशक्तिहतं चकार बुद्धस्तु केवलमयं जगतो हितैषी ॥३॥ ......पीड्यो ममायमयमेव च रक्षणीयः। बध्योऽयमित्यपि सुरोत्तमनीतिरेषा निःश्रेयसाभ्युदयसौख्यहितैकबुद्धैः बुद्धस्य नैव रिपवो न च बञ्चनीयाः ॥४॥ बन्धुर्न मे स भगवान् रिपवो न चान्ये साक्षान्न दृष्टचर एकतरोऽपि चैषाम्। श्रुत्वा वचःसुचरितातिशयप्रभावम्बुद्धं गुणातिशयलोलतया श्रिताःस्मः ॥१०॥ पौराणी श्रुतिरेष लोकमहितो बुद्धः किलायं हरिर्दृष्ट्वा जन्मजराविनाशवशगं लोकं कृपाभ्युद्गतः। जातःशाक्यकुलेन्दुरद्भुतमतिस्त्राता नृणां गौतमःशास्तारं हितमेव कस्तमधुना नावैति मूढो जनः ॥१४॥ चतुर्ज्जलधिमेखलाकुलनितम्बभारालसां विसृज्य हरये महीं बलिरवाप कष्टां दशाम्। प्रदाय मुनये तु पांशुलवमप्यशोको नृपः क्षितिं सकलचन्द्रमण्डलतलाञ्च सम्प्राप्तवान् ॥१५॥ पक्षपातो न मे बुद्धे न द्वेषः कपिलादिषु। युक्तिमच्च वचो यस्य कार्यस्तस्य परिग्रहः ॥१९॥ यस्य च न सन्ति निखिला दोषाः सर्वे गुणाश्च विद्यन्ते। ब्रह्मा वा विष्णुर्वा महेश्वरो वा स मे शास्ता ॥१६॥ देवताविमर्षस्तुतिः ॥ ॥ कृतिरियमाचार्यब्राह्मणशङ्करस्वामिपादानामिति ॥७॥ शुभसंवत् ४६६ नष्टचैत्रशुक्लचतुर्थ्यां तिथौ रोहिणीनक्षत्रे सौभाग्ययोगे बृहस्पतिवासरे संपूर्णदिने ॥ ( इयंस्तुतिः मदन्तिकस्थितप्राचीनभुजिमोलरञ्जनालिपिद्वयलिखितव्यासपुस्तकेऽस्ति गण्डीस्तवादिकमन्यदप्यस्ति ) अमोघवज्रो वज्राचार्यः, नेपालकाष्ठमण्डपकाठेसिम्बुनवासी ( संस्कृतसन्देशात् )

श्रीः

## भूमिका

श्री ५ गोरक्षेश्वरपृथ्वीनारायणसाहस्य भक्तपुरेश्वररणजिन्मल्लेन सह मित्रताऽऽसीत्। अत एव रणजिन्मल्लेन पृथ्वीनारायणोऽनुरुद्धः—यद्मम पुत्रमध्यापयितुं सुयोग्यं विश्वसनीयमेकं विद्वांसं प्रेषयतु इति। एवमनुरुद्धेन पृथ्वीनारायणेन भक्तपुरे रणजिन्मल्लप्रासादे स्वकीयो विश्वस्तो-विद्वान् अर्ज्यालोपाद्धश्चक्रपाणिः प्रेषितः। सोऽयं चक्रपाणिर्भक्तपुरे राज प्रासादमधिवसन्, राजकुमारमध्यापयतिस्म।

एकदा भक्तपुरेश्वरेण रणजिन्मल्लेन चक्रपाणिः पृष्टः पण्डितवर! अपेक्षणीये कस्मिंश्चिद् वस्तुनि न्यूनताऽस्ति चेदुच्यतामिति। ततश्चक्रपाणिनोक्तम्-राजन् भोजनाच्छादनादिकंतु सर्वं पर्याप्तं न तत्र कापि न्यूनताऽस्ति परन्तु मदीयानि सर्वाण्यपि पुस्तकानि स्वगृहे गोरक्षप्रदेशे एव सन्ति तैरत्र कार्यं न सिध्यति ग्रन्थाभ्यासव्यसनि मदीयं मस्तिष्कं पुस्तकान्यवलोकयितुं भृशमुत्कण्ठितं वर्त्तते, इति। पण्डितस्येदृशीमुत्कण्ठां पूरयितुं राज्ञा रणजिन्मल्लेन बहूनि प्राचीनानि पुस्तकानि दत्तानि तेषामेव अन्यतममिदं पुस्तकं यद् इदं भवतां पुरस्ताद् मुद्रयित्वा प्रस्तुतम्।

"तदिदं वृत्तमालास्तोत्रं" धर्मश्रीमित्रेति नामधेयेन काश्यां विक्रमशीलविहारे नामसंगीतिग्रन्थे द्वादशाक्षरमन्त्रे व्याख्यानावसरे मतिकुण्ठनेन निर्विण्णेन काशीतश्चीनं गत्वा मञ्जुश्रियं पश्यामीति इच्छया नेपालं समा-

गतेन, महापण्डितज्ञानश्रीमित्रस्थविरेण रचितमिति पुष्पिकापर्यालोचनया प्रतीयते । स्वयंभूपुराणे च पूर्वपर्वते मञ्जुश्रियः पादपीठमस्तीति चर्चाऽस्ति यस्य दर्शनेन ज्ञानश्रीमित्रस्य चीनगमनोत्कण्ठा निवृत्त्यादिकथा श्रूयते । तदिदं स्थानं भक्तपुरमण्डले महादेवपुष्करिणीसमीपे वर्त्तते ।

सोऽयं महापण्डितस्थविरज्ञानश्रीमित्रो महायानपद्धतिमाश्रितो बौद्धसंप्रदायस्य प्रगल्भः पण्डित आसीत् । यस्य खलु वैदिकवाङ्मये तदुक्तकर्मकलापे च महती श्रद्धासीत् इति नर्कुटकच्छन्दःप्रतिपादकश्लोकरचनया स्पष्टं प्रतीयते श्लोकश्च—

तत्र गुणविस्तरप्रणयपूतवचोविभवं
वरद स एक एव सुमुखो मुखमावहति
मधुमयसामधाम यजुषा सजुषानुगतं
श्रवणसुधाभिमानभवनर्कुटकं च विधिः ।" इति

प्राचीनाः खलु बौद्धा मत्स्यकच्छपादि शावतारोपासनाकर्तृषु अन्यतमा आर्यगृह्या आसन् येषामेव सद्भावनया बुद्धोऽपि भगवतो महाविष्णोर्दशसु अवतारेषु अन्यतमोऽगणिष्ट । परन्तु महतः खेदस्येयं वार्ता कलिकालविलुप्तविद्येषु पारस्परिककलहग्रस्तेषु च भारतीयेषु सत्सु बहव आर्यागृह्या अपि बुद्धोपासकम्मन्या बभूवुः । यैःखलु बुद्धमार्गे बहवः पन्थानोऽसृज्यन्त येषांकृते दार्शनिकक्षेत्रे महान्संघर्षः प्रचलितो दृश्यते । यदीदृशा एव विद्वांसो बौद्धेषु अभविष्यन्, नायं दार्शनिकः कलहः प्रादुरभविष्यत्, पराभवश्च भारतस्य । अत एव आधुनिका बौद्धा अपि प्राचीनान् ज्ञानश्रीमित्रसदृशान्. बौद्धविदुषोऽनुरुध्य समस्तेऽस्मिन्संसारे सर्वमतसामञ्जस्याय



आदर्शाय च प्रयतेरन् इतिविचार्य पुस्तकस्यास्य प्रकाशनोद्योगः कृतः । सोऽयमुद्योगोऽस्मिन्. महति सम्मेलने सारङ्गनाथे ( सारनाथ ) लुम्बिन्यामुपस्थितैः समेतैः सर्वैः सफलीकरिष्यत इति मदीया मनीषा । यस्य विदुषः सौजन्येनेदं पुस्तकं प्रकाशनाय प्राप्तं सोऽयं विद्वान् पण्डितपद्मनाभकेशरी पूर्वोक्तराजगुरुपण्डितचक्रपाणितः पञ्चमः पुरुषः । तस्येयं वंशपरंपरा १—चक्रपाणि २:—दैवज्ञकेशरी ३—विद्यारण्यकेशरी ४—गिरिराजकेशरी ५—पद्मनाभकेशरी, इति ।

तदिदं पुस्तकं स्वग्रन्थागारतः प्रकाशनाय पद्मनाभकेशरिणा मह्यं दत्तं पुस्तकं प्राचीनं शुद्धं नेपालीयलिच्छविलिपिलिखितं प्रायः आसन्नद्वादशशतीवर्षप्राचीनं ताडपत्रलिखितं वर्तते । पत्रप्रान्ते क्षतिग्रस्तानि अक्षराणि महता कष्टेन लिपिरेखां प्रकरणानुसारिणं चार्थं विमृश्य पूरितानि। पुस्तकस्य प्रतिलिपिकरणे दत्तावधानो बौद्धपण्डितो रत्नबहादुरवज्राचार्य इतो लोकान्तरं प्रयातोऽपि स्सारंस्मारमभिनन्द्यते. तथा च यज्ञानन्दवज्राचार्यस्यापि परिश्रमः प्रशंसार्हः । प्रकाशनकर्मणि कृतश्रमो महत्तमो नेपालमृगस्थलीस्थगोरक्षपीठेश्वरो योगी नरहरिनाथश्च शताधिकधन्यवादार्हः । एवं श्रीमन्तं पण्डितपद्मनाभकेशरिमहोदयं च प्रति कृतज्ञतां प्रकटय्य संपादनकर्मणि जातानपराधान् क्षमापयन् विरमति ।

पं० बुद्धिसागरशर्मा पराजुली
नेपालवीरपुस्तकालयस्थः ।

# परिचय

१६ अङ्गुल आयाम । ३ अङ्गुल व्यायाम । ८ ताडपत्र । दक्षप्रान्त १ अङ्गुल मूषकदष्ट । २।४ अक्षर लुप्त । प्रतिपृष्ठ ८।८ पङ्क्ति । प्रतिपङ्क्ति ८०।८४ अक्षर । रिपुमल्ल पृथ्वीमल्ल नागमल्ल मलयवर्मा तथा अवसानलिच्छविलिपिसंवादिनी लिपि । प्राचीनानुनासिकाच् सार्धचन्द्र प्रयुक्त परिशुद्ध लेख । उभयार्थक पद्य । प्रायः १५० वृत्त । औचित्यपूर्ण रचना-सौष्ठव । प्रौढ पदविन्यास । अकुण्ठित प्रवाह । स्वतन्त्र शैली । वैदिक बौद्धादि अविसंवादिनी विचारधारा । सरस ग्रन्थशय्या । विचित्र पदमैत्री । प्रकृति-मनोहर वर्णनक्रम । अप्रतिहत काव्यशक्ति । अभिनव प्रकार । अनेक विषयप्रकाशक छन्दोमालामयी स्तुति । इत्यादि समग्र अनवद्य ।

**रञ्जितपद्—**ॐ नमो मञ्जुश्रिये ।। प्रस्तावना । गायत्री । वैश्व । तनुमध्या । शरण । सातिरेक । उष्णिक् । कुमारललिता । ऊर्ध्वगामि । अनुष्टुप् । उत्तम । समानी । प्रमाणिका । विद्युन्माला । माणवक । किसलय । चित्रपदा । बृहती । कटाक्ष । हलमुखी । रूप । भुजगशिशुसृता । मुद्रा । पङ्क्ति । अरविन्द । नलिनी । रुक्मवती । पणव । मत्ता । मयूर-सारिणी । शुद्धविराट् । वलय । त्रिष्टुप् । उपजात । भद्रिका । वृत्ता । स्वागता । भ्रमरविलसिता । दोधक । उपस्थिता । उपस्थित । वातोर्मी । रथोद्धता । शालिनी । श्येनी । इन्द्रवज्रा । उपेन्द्रवज्रा । उपजाति । वंशस्थ । इन्द्रवंशा । प्रमिताक्षरा । स्रग्विणी । वैश्वदेवी । जलधर-माला । द्रुतविलम्बित । मन्दाकिनी । कुन्दलता । वागीश्वरलील । यमुना । तोटक । पुट । जलोद्धतगति । चन्द्रवर्त्म । कला । जगती । महित । अति-जगती । कलहंस । प्रहर्षिणी । रुचिरा । मत्तमयूर । मञ्जुभाषिणी । वसन्त-तिलक । दैवत । अपराजिता । प्रहरणकलिका । सम्बाधा । अनङ्गचिरस्थित ।



मालिनी । कामिनी । सुगतप्रिय । शशिकला । स्रक् । मणिगुणनिकर । गुणमणिनिकर । अचलधृति । ऋषभगजविलसित । पत्रभङ्गरचना । कुमारलीला । अत्यष्टि । शिखरिणी । पृथ्वी । वंशपत्रपतितक । नर्क्कुटक । कोकिलक । हरिणी । मन्दाक्रान्ता । कुसुमितलतावेल्लिता । कर्णपूर । तमालपत्र । धृति । अतिधृतिमता । मेघविस्फूर्जिता । शार्दूलविक्रीडित । सुवदना । कृति । सिंहविक्रीडित । वृत्त । प्रकृति । सुन्दरी । स्रग्धरा । आकृति । मद्रक । विकृति । मत्ताक्रीड । अश्वललित । संकृति । तन्वी । अभिकृति । क्रौञ्चपदा । उत्कृति । भुजङ्गविजृम्भित । अपवाह । दण्डक । चण्डवृष्टिप्रयात । ऋण । गङ्गदत्त । वृत्तमालाकृता । प्रचित । प्रवृत्त । प्रतापोदय । ललित । इति दुष्करप्रभेदे वृत्तमालास्तुतौ समवृत्तानि । उप-चित्र । द्रुतमध्या । हरिणप्लुता । पुष्पिताग्रा । अपरवक्त्र । शिशुलीला । प्रियम्वदा । वेगवती । भद्रविराट् । केतुमती । यवध्वनेर्मतुष्त्रिया । अति-रुचिरा । शिखा । आख्यानिका । इति वृत्तमालायामर्द्धसमवृत्तानि । आर्यमञ्जुघोषस्य दुष्करप्रभेदो वृत्तमालास्तुतिः समाप्ता ॥ कृतिरियम्महा-पण्डितस्थविरज्ञानश्रीमित्रस्य ॥


**सुगृहीतपद्—**मञ्जुश्री । वरमुनि । नीलोत्पलपाणि । शास्ता । भगवान् । सौगत । जिन । उद्गत । मुनीन्द्र । सम्बुद्ध । सद्गुरु । अधीश्वर । वरद । ईश । श्रीनिकेत । बुद्धात्मजपङ्क्ति । उद्गीतकुलोदयशैल । प्रज्ञा-लोक । उपायरथस्थ । जाड्यविखण्डनशौण्ड । त्रैलोकीनलिनीसविता । बुद्धसुत । भुवनोद्योत । वादिव्रातप्रवर । श्रीधाम । धीमान् । विश्वचक्रवर्त्ती । जिनवंशभूषण । वादिपति । अधिप । समन्तभद्र । अधीश । अर्थिकर्त्ती । धर्माधिप । अक्षोभ्य । मौनीन्द्र । अधिनाथ । भारतीश । नाथ । त्रैलोक्या-नुग्रहव्यग्रमूर्ति । परमोत्तम । कृपाब्धि । बहुबुद्धकोटिनिर्माणपटीयान् । धर्मधातु । वागीश्वर । वरद । वादिराज । उत्तमलील । पटुभारतीवरटावरिवस्य । मञ्जुघोष । जिनमानसैकनलिनीकलहंस । उत्पलतरु । जिननयाभरण । वादिकुलदैवत । अमलधी । समाधिसुधाजुट् । मन्मथनिर्मथन । सुगतप्रिय ।

अधिपति । अतिरतिकरकथ । सुयति । उरुतरकरुण । गुरुदय । मृदुमति । करतलविनिहितकुवलय । जिनकुलकुवलय । बद्धवर्म । जगद्धितधानवी । विधुतशोक । निर्विहतप्रतिज्ञ । विरचितपंचचीर । अमरमन्दिरोपलविशालवक्षःस्थल । कृतान्तमदमर्दन । त्रिभवनाथ । जिनवंशभास्करकुमार । मधुमयसामधाम । त्रिभुवनविद्याधीश । अशेषबुद्धकुलाकलङ्ककलानिधि । मणिकुण्डल । अतिधृतिमतामीश । वरबुद्धवंशजलधिवृद्धिसुधादीधिति । परिभूतमन्मथकथ । खण्डितमार । वादिनांवरिष्ठ । अभिहताविद्य । अगम्यगौरवगिरांगुरु । वागीशान । विश्वहितैकासङ्ग । ध्वान्तध्वंसी । माराराति । हतवृजिन । जिनतनयभूविभूषण । उदारपराक्रम । पद्मनर्तेश्वर । आर्यवर्य । दशबल । नाथ । निर्माथिदुःखापह । परमोपकारैककृत्यप्रवृत्त । त्रिलोकीविशोकीकियानिर्विरामश्रमाश्चर्यचर्यानिधि । शुद्धसम्बुद्धवंशावतंस । शुद्धगुणधाम । करुणाबल । करुणावशवर्ती । तत्त्वसुधारसतृप्ति । सकलसमीहितसिद्धि । भवमथन । विभु । उरुकरुणारस । जयी । सर्वातिशयधाम । पविपद्मखङ्ग मणिचक्रकेतुमती मूर्ति । परार्थसम्पत् । असितसुगत । जिननयगदनरवलय । प्रशमसुखरसरसिक । सकलजिननयननयनी । सुचिरनिहितहितमतिकन्दाङ्कुर । विषमजनदमनघटितविकटमूर्ति । प्रौढप्रज्ञा । आर्यमञ्जुघोष ॥ इत्यादि ।

कपिलयोगिनिवासवनस्थली
कपिलवास्तुरथात्र च लुम्बिनी।
इह हि शाक्यकुले करुणामयो
मुनिरभूद्भुवि बुद्धतया श्रुतः ॥१॥

**योगी नरहरिनाथ**
**मृगस्थलीगोरक्षपीठ**
२०१३।२।२४

# वृत्तमाला




☞ लुम्बिनीकानने मायादेव्यां सिद्धार्थजन्म

तनुमध्या नीलोत्पलपाणि लोकेश्वरमूर्तिः ☞







बुद्धमूर्तिः ☞
सहस्रवर्ष पूर्वनिर्मिता नेपाले सर्वामूर्तयः,














ॐ

# वृत्तमालास्तुतिः

**ॐ नमो मञ्जुश्रिये** ॥ वृत्तं सममर्द्धसमं विषमञ्चेत्यामनन्ति-वागीशः । त्रिविधम्परार्थविधये समासतो व्यासतोऽनन्तं । प्रति-नियताकृतिरूढवरमुनिभिर्यत्र नाम सङ्गीतं । छन्दः पदञ्च परमं स्फुरति यथा विविधविन्यासैः । प्रतिरूपदर्शनादपि शक्याः सकल-क्रमेण गुरुलघवः । विगणयितुं धीमद्भिः किमपरमत्रानुयोगेन । प्र-भवतु विभ्रमहृतये विचिन्त्यमानं तदादराद्भवतां । सुकृतिमुखा भिजनानां वाचान्निजमेकमाभरणं ॥ **प्रस्तावना** ॥ धीगीः । श्रीणां ॥१॥ निजैकभूः । विभाति या ॥२॥ तद्गुणांशंसिभिः । सेव्यते चानिशं ॥३॥ समाश्रयस्खलन्मलैः । सुरासुराद्विषद्गतैः ॥ ४ ॥ नैकभवीयाभ्यासविवृद्धं । बोधविशेषं साधुदधानैः ॥ ५ ॥ गीतागायत्रीवच्छन्दस्त्वाद्या सद्भिः । वृत्तं भावि श्रेयो यस्यां सद्वा वैश्वं । नीलोत्पलपाणेर्लीलानिलयस्य । शास्तुर्जयतीयं मूर्त्तिस्तनुम-ध्या । प्रसीद भगवन्विलोकय मनाक् । जडजनमिमं त्वदेकशरणम् ॥६॥ जाज्वलीति शासनं त्वां समेत्य सौगतं । सूर्यधामदुःसहं साति-रेकमुष्णिहि ॥ दधत्यपि निकामं कुमारललितानि । तनुस्तव जिनानांकुमारललितैव ॥ जायते जनराशेर्यामनुस्मरतोपि । निर्धुता-धरभावमूर्ध्वगामि च रूपं ॥७॥ य द्गुणस्तुतिविस्तरादस्तसङ्गमनु-ष्टुभि । धीरमेकमुदीरयन्त्युत्तमं पदमुज्झताः । घोरमोहतामसाव-

रुद्धबुद्धिलोचनस्थ । रत्नयष्टिदीपिकेव या समान्यभूज्जनस्य । जग-
त्त्रयातिशायिनीम्मुनीन्द्रसम्पदं प्रति । स्फुरन्त्यशेषनायकप्रमाणि-
का॥पि सैव नः । तीव्रक्लेशप्लोषध्वंसप्रौढे वंशे सम्बुद्धानां । धत्ते
भूषां भातीयं तेऽम्भोदे यद्वद्विद्युन्माला । केतनदण्डन्दधतोध्याप-
यितुन्नीतिमिव । सद्गुरुलीला भवतो भाति जगन्माणवकं ॥
त्रिजगतो निजगतिं प्रथयतः पृथुधियः । करतलन्तव चलं किसलयं
तुलयति ॥ साधिगमं समकालं तत्वरसेषु विधत्ते । विश्वमधीश्वर
चित्रं चित्रपदा तव वाणी ॥८॥ बृहत्यां विभूत्यां त एके पदन्या-
समासादयन्ति । क्षणं यत्र ते लब्धलक्ष्यःकटाक्षोऽपि विश्रान्तिमेति ॥
त्वद्दृशैव परिमलनाद्धङ्गतामियमुपगता । भातिभूमिरिव जनता
सन्तताहितहलमुखी । वरद सा हि सञ्जन्यते परिणतिस्तयास्यां
यतः। वचनबीजमुप्तं त्वया फलति शान्तिरूपं फलं ॥ कलयितुमिह
कः शक्तस्तव खलु चरितानीश । सतमसि समये तोये भुजगशि-
शुसृतानीव ॥ किन्तूदस्यति धैर्यध्वंसी त्वत्कीर्त्तिश्रुतिजन्मानन्दः ।
स्वप्रौढिप्रतिपत्तिन्यस्तां लोकस्याननमुद्रामीश ॥ ६ ॥ श्रीनिकेत
लीलाचतुरन्ते प्राप्तपारविद्याचरणानां । भाति वर्ष्म बुद्धात्मजपङ्
क्तौ यद्वदम्बुजन्मस्वरविन्दं ॥ त्वामुद्गीतकुलोदयशैलं प्रज्ञालोकमु
पायरथस्थं । वन्दे जाड्यविखण्डनशौण्डं त्रैलोकीनलिनीसवितारं
रं ॥ बुद्धसुतानामभ्युदयोर्व्वी भाति भृशं भूत्यातवनाथ । शैलविशे
षस्येव शिखाभू रुक्मवती रत्नाङ्कुरकान्त्या ॥ निःशेषस्तव विज
यध्वानं तन्वन्भ्राम्यति भुवनोद्योत । सानन्दः कृतिनिवहः स्वामिन्



विश्वग्घोषणपणवो यद्वत् ॥ वादिव्रातप्रवरशिरोब्जश्रीधम्नस्तेगुण-
मधुयोगात् । धीमन्वीरानपिमदयन्ती त्रैलोकीवाग्विलसति मत्ता॥
विश्वचक्रवर्त्तिनां जिनानां वंशभूषणे त्वयि स्फुटैव। म्लायतीव सा
कुमारताख्यायामयूरसारिणीष्यते तु ॥ नानारत्नमरीचिमालिनी
प्रोन्मीलन्निजकान्तिसम्पदा । प्रत्यङ्गन्तव भूषणावली नीता शुद्ध-
विराट्पराभवं ॥ पातु जगत्तव तत्त्वनयाख्यानविधौ करवल्गितकं ।
वादिपते व्यतिघट्टनतो वल्गुनिनादचलद्वलयं ॥ १० ॥ रूपन्ते
गुणगणमथ कीर्त्तिं संवीदयाखिलमिदमतिशायि । विभ्राणं निज-
विषयविरामं मन्दं त्रिष्टुभि जगदुपजातं ॥ तनुरतनुदयाद्रवोप-
मस्फुरदनुपमकान्तिसन्ततिः । जनयति भवतो न कस्य वा मुदमधिप
समन्तभद्रिका ॥ शरदमृतकरकरश्रेणीसमहिमगतमलगौरीयं ।
गुणसमुदितिरिव मुक्तावली विलसति हृदि भवतो वृत्ता ॥ गीयमा-
नसुमनस्सुमनस्स्वजातिकिर्त्तिविजयेव तवेयं । भाति दूरततसौरभ-
लोभस्वागतालिपटलक्वणितेन ॥ स्फारामोदामधुनिधिरधिकं चू-
र्णांचातुःसममिवदधती । नीलाब्जश्रीर्दलमुखशयना सम्पर्याप्तभ्रम-
रविलसिता ॥ रूपरसायनभावनया ते वासव एव परं बहुमान्यः ।
येन चिराय निरस्तनिमेषं लब्धमदोधकमम्बकजातं ॥ भक्त्यानत-
रत्नकिरीटचक्रैरावद्धकराब्जलिभिः प्रहृष्टैः । धन्यैः सुचिरं चरण-
द्वयी ते वीतान्यविधेयमुपस्थितेयं ॥ किमिन्द्रविभवैर्ब्रह्मश्रिया वा
ततोप्यतिशयिन्या सम्पदा किं । प्रसिध्यति धियोधीश प्रकामं
त्वदंह्रिकमलस्योपस्थितं चेत् ॥ त्वत्संसेवाविमुखं जन्मदुर्गों

कर्मक्लेशौ विवशं नाशमस्मिन् । संभूयालं नयतोऽवश्यमुग्रौ
वातोर्मीपोतमिवाम्भोधिमध्ये ॥ दूरदर्शिमनसामनागसाङ्कापि विस्फु-
रति चित्तसन्ततिः । निर्विरामतममाभवं भवत्यर्युपासनमनोरथो-
द्धता ॥ छेदे हृद्या विभ्रमाणां चतुर्णांतूर्णांप्राप्तावार्यसत्यामृतानां ।
पुण्यावस्था त्वत्कटाक्षेक्षणेऽपि प्रौढप्रज्ञाशालिनी काप्युदेति ॥ की-
र्त्तिरर्त्तिकर्त्तिनस्तवस्तवस्तोमसद्मनोऽतिसद्मनो हृतः । सान्द्रचन्द्र
चन्द्रिकार्द्रचन्दनश्येन्यलङ्करोत्यलं दिशो दश ॥ अभ्युद्गतानेकशिखा-
भिरुच्चैस्त्वत्संश्रयाद्दुस्त्यजसत्वस(स्तृ)ष्टिः । प्रध्वंसमन्वञ्चति शैलमूर्त्ति
स्तीव्रेन्द्रवज्राहतिदारितेव ॥ विरूढधर्माधिपभावभव्यप्रतुङ्गसिंहा-
सनसन्निषण्णं । उपा ( सते ) कान्तशिवाः शिवापत्युपेन्द्रवज्रायु-
धवेधसस्त्वां ॥ अनन्तरोद्भावितलक्षणाढ्यौ पादौ भवेतामपि गोचरौ
ते । यासां दृशः अव्ययतिप्रपञ्चौ धन्याः सुराणामुपजातयस्ताः ॥
॥११॥ असंशयं त्वामपरेषु सत्स्वपि प्रकामसर्वात्मगुणानुहारिषु ।
अनन्यसाधारणया धियाधिपा उशन्ति वंशस्थमनङ्गजिष्णवः ॥
वालाकृतिङ्कान्तविचित्रभूषणं हेमाभमक्षोभ्यसनाथशेखर (रं) । वा-
गीश्वरंवाग्मतिमूर्त्तिभिर्नमे मौनीन्द्रवंशाभरणोदयश्रियं ॥ अतिवि-
स्तरैरपि गिरां सुगिरो गुणपारमीयुरधिनाथ न ते । निजमोदमात्र-
जननीतिनुतिः प्रमिताक्षरापि सुभगैव मम ॥ दीप्यमानाखिलालङ्कृ-
तिश्लाघिनी पुण्यभाजां मुखाम्भोजलब्धोदया । भारती भारतीश
स्वभावोज्ज्वला त्वामुपैति स्वयं सद्गुणस्रग्विणी ॥ भङ्क्त्वीतास्ते
पञ्चबाणस्य बाणाः शान्तो द्वेषाग्निर्मोहजाड्यन्निरस्तं । नाथ त्रैलो-



क्यानुग्रहव्यग्रमूर्ते सम्पत्सम्प्राप्ता वैश्वदेवी त्वयैव ॥ सम्पूर्णानन्तगु-
णगणरत्नैश्चित्रैरम्भोराशेर्यतिमतिधैर्याद्धृत्से । संक्लेशाग्निप्रशमन-
सद्धर्माम्भोधारासारैर्जलधरमालालीलां ॥ तव वपुः परमोत्तम स-
म्मताः प्रतिभया विकलाः प्रतिवादिनः । सुलभमूकदशा बहुमन्वते-
द्रुतविलम्बितमप्युदितम्वचः ॥ त्रितयमपि पवित्रयन्ती जगत् तुहि-
नकरकरावदातद्युतिः । प्रभवति भवतश्च कीर्त्तिश्चिरं सुरगिरिशिर-
सश्चमन्दाकिनी ॥ हरति नितान्तमियन्तव कीर्त्तिः कृतिहृदयानि
दयानिजवास । प्रसवचयेन चितेव समन्ताद्दिशि दिशि कुन्दलता
दलताऽलं । दलयत्युपात्तशोभासमवायो जगतामघानि कोऽप्येषकृपा-
ब्धिः । बहुबुद्धकोटिनिर्माणपटीयान् धृतधर्मधातुवागीश्वरलीलः ॥
प्रविकिरतीव वियत्तरङ्गिणी तरलतरङ्गरुचो रुचां चयान् । विलसति
शश्वदसिर्दशान्तरे तव यमुनाजलवीचिमेचकः ॥ अविरलमौक्तिक-
प्रकरभूषा हरति न कस्य चित्तमियमीश । सुरुचिरमल्लिकासमय-
सेव्यप्रतिनवमालिनीव तव मूर्त्तिः ॥ तव नाथ परं यदि कान्तिसुधाज-
लधौ श्रममुज्झति झाङ्कृतिनि । शुभरूपनिरूपणलम्पटकम्परितोटक-
मञ्जजगन्नयनं ॥ वरद विरतिभाञ्जि व्यक्तमङ्गान्यतिभवभवितानोऽ
वश्यमेव । तव वचनसुधायाः पानपात्रं श्रवणयुगपुटोऽयं प्रीतिहेतुः ॥
वृणे वरमिमं त्वदेकमतुलप्रभाव भवतान् न मादृशजनः । भवन्त-
मपि यः श्रयन् शमसुधारसेषु विरतिर्जलोद्धतगतिः ॥ त्वत्प्रसाद-
मुदीर्णशुभवशादष्टभेदिसुखमेव कृतिजनः । लोचनोत्सवविधासु-
नुभूतां चन्द्रवर्त्मसमुपैति भवभिदां ॥ सुखदुःखातिशयादिहेतु-

जातैरविलुप्तस्मृतयो भवन्ति भव्याः । तव पादाश्रयलब्धबुद्धिसाराः
सकलायामपि वादिराजगत्यां ॥ १२॥ तव चरणपरिचरणरुचीनां
किमपि सुखमुदयति कृतिरूपं । निखिलमलपटलविगमदीप्र
प्रथिमगुणमहितमतिजगत्यां ॥ कलधौतकान्तवपुरुत्तमलीलः पटु-
भारतीवरटया वरिवस्यः । इह मञ्जुघोष इति वः प्रथितोऽव्यात्
जिनमानसैकनलिनीकलहंसः ॥ विच्छेदंक्षिषु यदि दुःसहेष्वमीषु
क्ले शेषु स्फुटमणुशोपि दुष्करः स्यात् । प्राप्येत कनु खलु नाथ मूर्त्तिरी-
दृक् त्रैलोकीनयनमनःप्रहर्षिणीह ॥ पयोनिधौ विरतिमपां विधाय च
स्फुरन्महाकिरणकलापरत्नधौ । भवादृशां वपुषि च कान्तिसन्ततिः
समीक्षते यदिरुचिरेयमीदृशी ॥ मन्द्रध्वानैर्यामृतधारास्त्वयिरम्या
मुञ्चत्युच्चैर्विस्फुरति प्रीणितभव्ये । नाथान्वेति व्यक्ततयात्यन्तमनोज्ञ
वर्षाम्भोदं सैव सति मत्तमयूरं ॥ जयतीयमुत्पलतरोरनुत्तरत्रिजग-
त्प्रमोदजनने मधाविव । त्वयि नेत्रकान्त कुसुमोद्गता लता मधुमत्त-
भृङ्गरवमञ्जुभाषिणी ॥ १३ ॥ सर्वातिशायिगुणनिर्भरलब्धमोदै-
र्विद्वन्मधुव्रतकुलैरुपगीयमानं । मन्यामहे जिननयाभरणं तवैव वृत्तं
वसन्ततिलकं नवचूतमेव ॥ सम्मुखवलन्मुखमृगाधिपतिपृष्ठारूढ-
मतिगाढदयमभ्युदयकन्दं । सुन्दरिमवन्धुरितहेमहिमपादं वादिकुल
दैवतममन्दमभिवन्दे ॥ प्रशमितसकलप्रपञ्चनिरावृतिप्रसरदमल-
धीसमाधिसुधाजुषः । दमयति भवतो हताहित विक्रमा मुनियति-
रपराजिता भुवनत्रयं ॥ प्रतिभयवपुषामकरुणचरितप्रशमनविधये
क्वचिदपि कृपया । तव भुजपलिघावलिरतिविषमा विलसति



विविधप्रहरणकलिका ॥ श्रेयःसम्भोगं विषयविरतिमव्यग्रां मारप्रध्वं-
सं त्रिभुवनहितसम्पत्तिं । दुष्प्रापाहार्यम्पदमभिलषतां तच्च त्वद्भक्तेर-
न्यावरद न दिगसम्बाधा ॥ भवतः कलां किमपि संयतैरिन्द्रियैः-
क्वचिदादरस्तिमितधीर्यदि ध्यायति । अचिरात्स्वयंवरयतीयमेन-
मञ्जनं वसुधा ध्रुवं जलधिशक्वरीभूषणा ॥ १४ ॥ स्वेदपूरविलसत्पु-
लकोच्छ्वसितैस्त्रुटकञ्चुकन्दधति निर्द्धुतमप्यमरस्त्रियः । कान्तिकम्र-
मिव ते समितावतिशक्वरी धन्वसारमुरुकम्पमनङ्गचि (र) स्थितं ॥
अनुपमरमणीयाँ भङ्गिरङ्गेषु यस्या हरति रतिमुदाराशेषरूपान्तरेषु ।
जयति तनुरखण्डाखण्डलेष्वासलक्ष्मीविजयपरमधामव्यामरुग्मा-
लिनीयं ॥ अविकलतालशालिकलकाकलीकलव्यतिकरवल्लकीव-
लतचारुपञ्चमा ॥ भणति मुदा प्रतीष्टजिनभार भारती स्वमहिम-
कामिनी तव सभा सुमद्रकं ॥ जयति नाथ जगज्जयकुञ्जरनिश्चली-
करणशृङ्खलजालनिभाङ्गदभूषितः । भुजतरुस्तव दुर्गतिमार्ग-
महार्गलः प्रमदमन्मथनिर्मथनः सुगतप्रियः ॥ भवशिरसि महित-
गुणमहिमभुवं व्यपगतसकलमलशुचिमधिपते । तव वरविजयस-
मुपचितयशसः श्रियमनुहरति हि शरदि शशिकला ॥ पटुपरिम-
लमिलितमधुकरयुवभ्रमसहशितिसुगतसमुचितसुखा । विलसति
तव शिरसि रसलयवतीस्रग्वियममरपतियुवतिविरचिता ॥ नयतिपद-
नयसि यदतिदयधियः प्रथयसि जगति च परहितकृतिनः । जनयति
हिमचयरुचिरिति भवतो वियदुपहतनिजमणिगुणनिकरः ॥ अति
तिकरकथ कथमिव समियादविरतनवनवनव तव परमैः । गुणगण-

परिमितिमुदधिषु यतिभिः सुयतिभिरगणितगुणमणिनिकरः॥१५॥
जयति तव तनुरियमुरुतरकरुण निखिलजगदुचितपरिभुगवनि-
रिव। शिशुमतिकलितसकलजनबहुविधविमतिलडितविधिभिरचल
धृतिरिह॥ प्रतिजलधियमिह समधिकगुरुदयमृदुमतिरपि तव शुभ-
मयसमुदयः। करतलविनिहितकुवलय कलयति जिनकुलकुवलय-
मविषमभरमिति॥ व्योमविकिरणकीर्त्तिमदपरिमलकलना, भङ्गुर-
तुङ्गवादिमदकलकरिनिकरं। विश्ववनोदरेत्र रचयति जितजलद
नाथ दधास्युदारमृषभगजविलसितं॥ कस्त्वयि वद्धवर्मणि जग
द्धितधानधिया निर्विहतप्रतिज्ञ परितापकणः क्वचन। मारवधूजनस्य
कमनीयकपोलतले यन्नवपत्रभङ्गरचनालस एव करः॥ निरुपम
रम्यरूपजिनजातदृश्वनोष्टौ मदयति तेधिकं विधुतशोकलोकपालान्
सदुपधिपुण्डरीकनखराजिराजितेयं विरचितपञ्चचीररुचिराकुमा
रलीला॥१६॥गुणानामत्यष्टिःकथमिह ममेवास्तु जगतामितिच्छन्द
स्वैरं परिणतिमवापत्तव तथा। यथा त्वय्येवास्मिन् परमरसभेदप्रण
यिणी( नी )ससुद्भूता भूतिर्निखिलसुखशाखा शिखरिणी। जयत्यम
रमन्दिरोपलविशालवक्षःस्थलः स्थलीकमलकाननप्रतिमपादकन्द-
प्रदः। प्रभाकरशताधिकप्रकटतेजसालङ्कृतः कृतान्तमदमर्दनंस्त्रिभ
वनाथ पृथ्वीधरः॥ विमोहवहलान्धकारपटलावनद्धैर्सुधा रसातल
गुहातिशायिभवसंकटेषु स्थितं। त्वदंह्रि ( ङ्घ्रि ) कमलाश्रयोत्सव
सुखं न चेदाहृतं चिरस्य जिनवंशभास्करकुमार मारैर्जितं॥ कल
शतोपपादितमहा फलमिव विहितं चञ्चलमेतदायुरधिप त्वदवन



तिपरैः। भूषणभव्यभावगमितश्रितगुरुकरुणादिग्पतिवंशपत्रप-
तितं कमिव जलरुहः॥ तव गुणविस्तरप्रणयपूतवचोविभवं वरद-
स एक एव सुमुखो मुखमावहति। मधुमयसामधाम. यजुषा सजु-
षाऽनुगतं श्रवणसुधाभिमानभवनर्कुटकञ्च विधिः॥ त्रिभुवनस-
म्मदप्रदजिनव्यवसायमधौस्फुटसहकारतामहितमीहितमेति तव।
प्रवचनमञ्जरीस्रुतसमामृतपानमुदाऽभृतयतिषट्पदं कलकणत्कृतिं
कोकिलकं॥ क्वचिदपि भवद्भीत्या भूरिप्रवादिमदद्विपोद्दलन न
सुगत स्वान्तद्माभृद्गभीरगुहागृह। त्रिभुवनविद्याधीशक्रीडाँरसार्णव-
संयता द्रवति हरिणीवारं मारप्रचण्डमहाचमूः॥ दुर्दान्तानां दम-
नविधये क्वापि कारुण्यवेगात् धत्से मूर्त्तिञ्चरणशिखया ख्यातवि-
क्रान्त यस्याः। त्रैलोकीयं श्रुतरसभिदाक्रन्दनादैकवृत्तिर्मन्दाक्रान्ता
व्रजति विलयं नाथ न स्वास्थ्यमाशु॥ १७॥ शोभासम्पत्तिः शिरसि
करुणैकेन सैवोपजाता या स्यात् कल्पद्रोः शुभफलनिभं विभ्रतोभद्र
कुम्भम्॥ ख्यानप्रेङ्खत्कर कररुहोद्भासिनी भाति भर्त्तुर्दोर्वल्ली चेयं-
कुसुमितलतावेल्लितेवानिलेन॥ वृत्तमेतदशेषवुद्धकुलाकलङ्ककला-
निधेराहितं हृदि चेन्महाजडहारहारितवानसि। जिह्वया प्रणयीति
चेद् घनसारसारमदेन किं कर्णपूरमकारि चेत् खण्डितं मणिकुण्ड-
लं॥ उपचितपुण्यसंचयशचीकरतलसुखदैः परिचरणैरतृप्तिगमिव
स्वमसममहिम-॥ मणिमयपादपीठफलकं स्फुटयति भवतः कलित
तमालपत्रमलिकान्नमतिशतधृतौ॥ १८॥ परार्थे स्थास्नूनामति-
धृतिमतामीश विश्वानुकम्पामुखोन्मलन्नानाँरसरसपदौंकर्णयावे-

दयामि । दशां तामाधेहि क्षणपि गुरो पावनीं पावनानां समन्त ध्वान्तानि प्रहरसि यया **मेऽघविस्फुर्जितानि**॥पायाद्वो वरवुद्धवंश-जलधेर्वृद्धौ सुधादीधितिर्मञ्जुश्रीः परिभूतमन्मथकथः प्रज्ञाङ्गना-सङ्गमे । भीमभ्रान्तिविभावरीपरिभवेँ विभ्रद्यतिम्भास्वतो विश्व-क्लेशाकुरङ्गसङ्गरविधौ **शार्दूलविक्रीडितं** ॥ १९ ॥ अन्तस्त्रासांकुरो भोत्पलिततनुरुहैस्त्रैलोक्यविजयावस्थान्ते वीक्ष्य भग्नँ सुरमुनिवि-सरैँ रुग्रग्रहनुदः । कारुण्यादुद्यतस्याप्यमलतरशरज्ज्योत्स्नापरिकरा-दिन्दोर्विम्वादनर्घस्मितवसु**वदना**शेषप्रियकृतौ ॥ भयभग्नैरतिदूर-तोविरहिणां पत्रैः श्रयायायताममराणां गुरुभक्तिनिर्भरमनोव्यक्तौ सहायोपमं । गगनामेयरयं युगान्तजलदध्वानाधिकद्वेडितं परितः खण्डितमारमस्तु जगतस्त्व**त्सिंहविक्रीडितं** ॥ व्याप्तविश्वया. शर-न्नभस्तलातिशुद्धया धियाऽधियातदुःसहार्त्तिविक्लवा प्रमेयसत्व-धात्वधीनसत्कृपाढ्य । संसृतौ च निर्वृतौ च शश्वदप्रतिष्ठवादिनां-वरिष्ठ वृत्तमीदृशं तु नामतोपि नापरस्य सिद्धिमभ्युपैति ॥ २० ॥ तीव्रतापविद्रुताग्र सच्छटासदृक्कटाक्षसंयमक्षणाधीनविश्वसञ्चयै-श्चतुर्दिगीश्वरैः **प्रकृत्युद**ञ्चितात्मभिः । स्फारविभ्रमप्रपञ्चपञ्च-पञ्चवाणजिष्णुभिर्दशात्मना **सुन्दरी**जनेन चातनोषि कामप प्रकाम विस्मयां श्रियं ॥ उत्कीर्णोन्निद्रकुन्दप्रकरमिव दृशां चारुभङ्गै-स्त्रिभागैः स्वेदस्रस्ताङ्गरागस्नपितमिव मुहः कान्तकान्तिच्छटाभिः । व्याप्तं व्योम त्वदर्च्चारुचिभिरभिहताविद्यविद्याधरीभिः सौरभ्या-कृष्टहृष्टक्वणदलिपटलोल्लो(।)सित**स्रग्धराभिः**॥२१॥ **आकृतिजन्म-**



वृत्रविभवक्रमातिशयसम्पदः सुखमियादीश दिगन्तगीतममलं यशश्च शरदिन्दुसुन्दरतरं । गायति यस्तवाह्वयमयं सदैव भगवन्भवा-ध्वगजनो नूनमगम्यगौरवगिरां गुरो गुण**समुद्रमद्रकमिदं** ॥२२॥ मध्वासारस्नातोभ्रान्तप्रवलमदमुखरमधुकरनिकरं प्रीतेरेकं लीला-वासं विदितवलमपि मुनिहृदय**विकृतौ** । वागीशान त्वय्येकान्तँ वसुविषयँविरतिसमुपचितवलिः सम्भोगश्री**मत्ताक्रीडं** वरद विवि-(धि नियतमनुभवति सुधीः॥ मदगुरुगण्डगर्ज्जितजितोन्नताम्वुदगजे-न्द्रवृन्दमनिलं निशितसमस्तशस्त्रकिरणप्रभाम्वरपिनद्धपत्तिनिवहं । प्रवररथाधिरूढसुभटं वलं वलभिदं (निभं) त्वदेकशरणं श्रयति नरं मनोहरयतिप्रवेशवशगोत्तमाश्च **ललितं** ॥२३॥ प्रीनिनिवासं **कृति-**भुवि विदितोदारवरप्रदवरिवसनं त्वां यः स्मरतीश प्रतिहतविमतिः सन्ततमन्तिमपदमुदितेषु । यौवनलीलाँसचिवसमुदयतँ पञ्चक-स्वरयतिरमणीया स्यादिह **तन्वी** हिमकरवदनातद्वशगा सह नर-पतिलक्ष्म्या ॥ २४ ॥ विश्वहितैकाँसङ्गसहान्तँःकरणाकरणवसुँपद-मिव परमां योधिप गृह्णातीह तवाख्यान्त**मभिकृति**वसतिरपिभुवि सरसी । सिध्यति मज्जद्दिग्गजगण्डच्युतमदपरिमलसुरभितसलित् सारसहंस**क्रौञ्चपदा**ङ्कोत्कनककमलवनरणदलिपटला ॥ २५ ॥ ध्वान्तध्वंसिन्मारारातँ हतवृजिन जिनतनयभूविभूँषणमु**त्कृतौ** प्रौढोन्मीलल्लावण्यश्रीः स्थितिजनकगिरिभवभिदामुदारपराक्रम । त्वय्यारब्धा वन्ध्याराधोविधुरयति वरद सुधियां विराज-तयास्फुरन् भोगासक्तोपीह स्वैरं विषमतमविषयतनुभृत् **भुजङ्ग-**

**विजृम्भितं** ॥ तन्वत्सुस्फुटमविरतममितममृतरसकणमिव परितोऽ-
ङ्गेषु प्रत्यालोचनसमुदयिँ नवरसरसँपदमसदृसँमतुलश्रीकः ।
यत्कृच्छ्रैरपि नसुलभमपरविविधसुकृतविधिभिरभियुक्तात्मात्वत्से-
वातरुफलमिह समनुभवति तदखिलविपदपवाहाख्यं ॥ २६ ॥
चपलचरणपीडितागाधिपोपेतपातालतालूच्छलद्व्यालपालस्तुतं
जयति जयति चारुकारुण्यकेलिस्फुरत्पद्मनर्त्तेश्वराकारलीलायितं ।
अनिभृतभुजदण्डषण्डप्रचण्डानिलोल्लासितः श्रान्तिशान्तिन्तनो-
तीव ते प्रलयसमयशङ्कया यत्र लोकत्रयी**दण्डकश्चण्डवृष्टि-**
**प्रयातों**ऽम्बुदः ॥ २७ ॥ प्रतिपदमिह जातशुद्धेः समाधेस्त्रयस्या-
त्तरस्याभिसम्वर्द्धनादन्त्यरूपस्पृशः समधिगमवशाज्जयत्यार्यवर्यैः
प्रभूतप्रमोदैः प्रगीतः प्रभावप्रकर्षस्तव । वरद यदनुमोदनावाद-
सांराविणातृप्तचित्तैः सुरैर्वाद्यमाना नयान्ति श्रमं. अपरिमपरमो-
पकारोत्त**मर्णा**जीवव्यालजीमूतलीलाकरोद्दामशङ्कयादयः ॥ ३० ॥
प्रविकचकनकपङ्केजसौभाग्यभागङ्गदत्तेन भावाश्रितेभ्यस्तमःसु
त्रिभुवनशमविधानाय निर्वाणनी**वृत्तमालाकृता**वात्तभक्ते(ऽतिचा)
रौ। दृशवलतनयवर्गाग्रिमेण त्वया नाथ निर्माथिदुःखापहेन
स्तुतेन **प्रचित** इति शुभराशिर्महान्यस्ततः स्ताज्जनौघे समृद्धिः
समग्रेपि सैव ॥ २७ ॥ अहमपि तव पादपद्माभिसंराधना (धाम)
धीसन्निरुद्धान्तरध्वान्तजातः समधिगतसमस्तवस्तूत्करव्यापिनै-
सर्गिकस्वप्नमायामयाद्वैततत्त्वः। अकरुणकरुणावलाचार्यवीर्योद-
यारब्धनानाविधव्यापृतिव्यस्तमारस्त्रि (जगति) परमोपकारैककृत्य



**प्रवृत्त**श्चरेयञ्जनो यावदेकोप्यमुक्तः ॥२८॥ स्फारफुल्लस्थलाम्भोजनि-
र्भासभृत्पादपीठान्तविश्रान्तकान्तामरव्यालदैत्येन्द्रचूलोपलार्च्चिचश्च
(ते) दुःसहोद्दामदुःखानलग्रस्तपर्यस्तशक्तित्रिलोकीविशोकीक्रिया-
निर्विरामश्रमाश्चर्यचर्यानिधिः । शुद्धसम्वुद्धवंशावतंसप्रकाशस्फुरत्
कीर्त्तिकीर्णान्तरालप्रसारः कुमारो जयत्येष वागीश्वरःसर्वदुर्व्वार-
मारप्रवीरध्वजिन्युद्धवध्वंसवद्धाभिरामासमप्रौढिनिर्व्यूढगाढप्रता-
**पोदयः**।३६।प्रौढवरवज्रवनिताङ्गपरिरम्भविलसत्पुलकजालकजगज्ज-
यतनुत्रं सान्द्रसवसास्रमधुपानमदमुक्तविकटाट्टहसितत्रसदशेषसुरदै-
त्यं।गाढविनिगूढदयविस्मयमयाप्रतिमरौद्रतनुमद्वयमहार्णवनिमग्नं
शुद्धगुणधामकरुणावलमुदारनव (ना) ट्यरसव**ल्ललित** वृत्तमभि
वन्दे ॥ ३० ॥ इतिदुष्करप्रभेदे वृत्तमालास्तुतौ समवृत्तानि ॥
इदमर्द्धमवालशशिप्रभं वालरविप्रभमादधदर्द्धं । करुणावश-
वर्त्तिभवद्वपुः कस्य मनो न करोत्युप**चित्रं** ॥ तत्वसुधारसतृप्ति-
विशेषात्सकलसमीहितसिद्धिवशाद्वा । त्वच्चरणार्द्धभुवा भवितव्यं
भवमथनश्रुतन**द्रुतमध्या** ॥ किमुशन्ति वुधा अधिकं विभो. यदि
जनीयतनीयतनुर्भ (वे) त् । तव दृष्टिसुधारसधारया स्फुरित-
हाररुचा **हरिणप्लुता** ॥ इयमुरुकरुणारसा. मुखश्रीः समधि-
गता निजधीश्रियो रसेन। स्फुरदधरदलातिहारिहेमाम्वुज-
कलिकेव विभाति **पुष्पिताग्रा** ॥ मु (ख) मिदमपरं तवोत्पलप्रक-
ररुचामिव भाति सञ्चयः । समुदितमिव कैरवश्रिया हरति मनो-
ऽ**परवक्त्र**मीदृशं ॥ इदमर्द्धसमं समीद्यते ते वत वृत्तं जयिनो जगत्त्र-

यस्य। क्वचिदर्थविधौ विधूतविश्वा **शिशुलीला** ललितापि यत्त्वेयं ॥ पदमेकमवेदयते क्षणं प्रसभाक्रान्तजगत्त्रयीशिखं। कथमस्तु न विश्वभारती निजदासीव तव **प्रियम्वदा** ॥ स्वरसोपनतां शमशय्यां किन्तु विधूय धियोप्यतिदुर्गैः। अतिचित्रचरित्रशतैस्ते **वेगवती** करुणा यदि न स्यात् ॥ सर्वातिशयस्य धाम. धाम्नः. सर्वाङ्गीणसुलक्षणलक्षणश्रीः। (लोक) स्य गतापि हि स्मृतिं ते. भद्रं. **भद्रविराट्** तनुस्तनोति॥ परितः स्फुरद्भिरभिरामैरंशुमयैः परार्थपरमार्थैः। पविपद्मखड्गमणिचक्रैः **केतुमती** विभाति तव मूर्त्तिः॥ चे (त्यशोभि) भावभावि भाव्यते क परापरार्थसम्पदीदृशी दयायां। सेयमेतदाकृतिच्छलादतोऽवयवध्वनेर्मतुस्त्रिया समाभिधाना॥ उदयदरुणकिरणनिकरपरिकरकनकमयविमलहिमक (ररज) नी! जयति निखिलजगदभिरतिकृतिपटुरतिभवभवतनुरियम**तिरुचिरा** ॥ अर्द्धार्द्धे ॥३१॥ त्रिभुवनदुरधिगमचरणपरिचरणगुरुविभवभगवदसितसुगत। प्रतिकृतिसचिववि (मलम) णिनिचयखचितसुपरिघटनगुणवसतिः॥जिननयगदनरवलयलवसमनुकृतिरसिकनिभसुरभिसुरसुमनः। परिमलमिलदलिकुलकणितनिधिरधिगमजलद जयति तव **शिखा** ॥ २६ ॥ समुदयदिशि समुपनतरुचिषु विविधसमुदयकरणमभिदधती. प्रशमसुखरसरसिकमतिषु निरुपमशमसुखपथकथनप्रथुनिरतिः। अपरिमितसुकृतफलमधिप तव जयति सकलजिननयननयनीगी. ऋजुमतिषु नियतमृजुरमृतकुटकुटिलमतिषु निरनिशय**कुटिलपदा** ॥



तद्विपर्ययः॥ **आख्यानिके**यंभवतो गुणानामितिस्तुवंस्त्वामभिमन्यते यः। नूनं स गण्डूषजलोपयोगात्मया निपीतोऽम्बुधिरित्यवेति ॥ अपि त्वशेषस्मरवैरिणामप्याख्येयताख्यातिमनाश्रितेषु। गुणेषु ते नाथ वृथाभिमानस्याख्यानिकासौ **विपरीतपूर्वा** ॥ **इतिवृत्तमालायामर्द्धसमवृत्तानि** ॥ अष्टाभिरच्चरैः पादोऽसोढस्तत्राढमज्जनादनुवृद्धैः। गुणसागर साग (भी) रैरपूरिताङ्घ्रीगर्त्तः। विषमं दशान्तरे दयापदचतुरूर्ध्वन्नयति भारं॥इति निगदितजातीकृतविषमचरणरचणायां लघुगुरुनियतिभृति भयमयति को न (मन) सि न यदि नियतमभिविधिवचनमनुपीडः॥ सुचिरनिहितहितमतिकन्दाङ्कुर इव तव भाति। विषमजनदमनघटितविकटमूर्त्तेस्त्रिपुरहरमुकुटमणिसदृशदशनकलिकेयं॥ प्रसरदुरुदहनघनघोरच्छटमिव गगनतलमनवधि दधाना। प्रसभमभिमुखन्ते प्रशमयति शमनमपि नयनवलवलवलीला॥ मृदुजनमनु पुनरियमेव प्रशमितस (कल) कटुकलुषविषराशिः। प्रतिमुहुरभिनवमतुलसुखनिधिमुपनयन्ती नियतममृतधारा॥ तडितोज्ज्वलं जलदराशिमनिशमुदभारबन्धुरं। घोरघनरसितमीशतनुः कृपया कुतोपि जगतीयमुद्गता॥ अत एव दुष्करतराणि विलसितशतानि तन्वतः। ह्लादयत्यखिललोकमिदं पटुकीर्त्तिसौरभकमद्भुतन्तव॥ भ्रूकुटीकटाक्षदशनेषु किमपि विकृतानि बिभ्रतः। दमयति तव भुवनानि वपुर्ल्ललितञ्च किन्तु विकटं यदीदृशं॥ प्राग्भारातिशयेपि तादृशेऽद्भुतभीमे भुवनाहितहतये समं समन्वात्। मरुदनतिशयरयः प्रचुपितम (लं) (थ) तव न समेति सलीलं॥ किं

भूयो भगवन्भवन्तमाश्रयमाप्तः स्थितभारमतुलमार्षभन्दधानं। तच्छुद्धविराड्विशेषणं ह्यपरविषमशिरसि पदं विनिधत्ते ॥ आराध्येति भवन्तमाश्रयैकसमृध्द्या कुशलं यदमलमस्ति वर्द्धमानं। तत-इदमखिलमुदञ्चतु भुवनमुरुपदं त्वदभिमतमतिविविधवृत्तविशेषैः॥ अपिच प्रचयेन भूयसा कुशलस्यास्य निकामनिर्मलस्य। विगलतु सकलस्य देहिनो भवरजनीप्रभवान्धकारराशिः ॥सर्वविषमाणि॥ किञ्च प्रौढप्रज्ञाप्रेयस्यालिङ्गनोनङ्गक्रीडां। उडुपतिरुचिनिचयमयमिव वपुरनरितिशयकरुणमिह वहदनु भवतु ॥ अर्द्धविषमं ॥ विचित्रवृत्तैरितिवर्णनेन यदाचितञ्चन्द्रकरामलं शुभं। ततोऽस्तु लोकः परिमुक्तशोकः स्फुरन्महासौख्यशिखासखीवरः ॥ पादविषमं ॥ आर्यमञ्जुघोषस्य दुष्करप्रभेदो वृत्तमालास्तुतिः समाप्ता ॥ कृतिरियम्महापण्डितस्थविरज्ञानश्रीमित्रस्य ॥

---

## योगप्रचारिणीमहासभातो गोरक्षग्रन्थमालायां प्रकाशितग्रन्थपुष्पाणि

१ गोरक्षस्तुतिमञ्जरी
२ गोरक्षयोगमञ्जरी
३ गोरक्षसहस्रनाम
४ गोरक्षसहस्रनाम गकारादि
५ गोरक्षस्तोत्रभूतिः
६ गोर्खावंशावली ( गोर्षाभाषा )
७ योगबीजम्
८ योगसाइत्री
९ श्रीनाथग्रन्थसूची
१० श्रीनाथकथासारः
११ श्रीनाथतीर्थावली
१२ श्रीनाथशिखरिणीकाव्यम्
१३ नवनाथकथा (गोर्षा हिन्दी भाषा)
१४ नवनाथकथा ( गुजराती )
१५ भैरवनाथावतारकथा
१६ भगवान्गोरक्षनाथकी कथा
१७ सांख्यवसन्तः
१८ शान्तिचरितम्
१९ हीरानाथचरितम्
२० नवलनाथ चरितम्
२१ भर्तृहरिनिर्वेदनाटकम्
२२ सिद्धचर्पटनाथपद्धतिः
२३ मत्स्येन्द्रपद्यशतकम्
२४ चर्पटशतकम्
२५ पाटेश्वरीशतकम्
२६ श्रीनाथशतकम्
२७ मत्स्येन्द्रशिखरिणीशतकम्
२८ दिव्योपदेशः ( गोर्षाभाषा )
२९ संस्कृतपारसीकपदप्रकाशः ( कोषः )
३० भक्तविजयकाव्यम् ( नेपालको )
३१ वाक्यपदीयब्रह्मकाण्डः
३२ महार्थमञ्जरी
३३ नियमावली
३४ अमरकथा
३५ अमरालोकः
३६ आदेशार्थप्रकाशः
३७ युक्तेन्दुवृत्तबिन्दुः
३८ चारों युगों में योगिराज
३९ भविष्यवाणीसञ्चयः
४० त्रिभुवनवंशमाला
४१ पाटेश्वरीस्तोत्रसंग्रहः
४२ भगवन्तनाथाष्टकम्
४३ प्रशस्तिरत्नम्
४४ गोरखालीसैनिकइतिहास
४५ मेरा उपक्रम
४६ सिद्धवीरजनाथचरितम्
४७ गोरषचालीसा
४८ योगदर्शनं सटीकम्
४९ वैश्वानरज्वालापुराण
५० कदलीमञ्जुनाथमाहात्म्यं
५१ इतिहासप्रकाश ४ भाग
५२ पात्रदेवकदलीयात्रा
५३ रतनबोध ( सिद्धरत्ननाथ )
५४ कल्यालवंशावली
५५ वृत्तमाला

मायापति प्रेस, मध्यमेश्वर, काशी।